# रोगचिकित्सायाः वैदिकोपायाः (मन्त्र-तन्त्र-यन्त्राणाम् विशेषसन्दर्भे)

प्रोफेसरहरीश्वरदीक्षितः *

**सारांशः**

मनुष्यस्य जीवनं जन्म-मरण-जराव्याध्यादिभिः षड्भावविकारैः निरन्तरं प्रभावितं भवति। पूर्वजन्मकृतकर्मणां फलस्वरूपेण विविधाः व्याधयः दुःखानि च जायन्ते इति शास्त्रेषु प्रतिपादितम्। तेषां रोगाणां तथा जीवनसम्बद्धानाम् अनिष्टानां निवारणाय शास्त्रेषु मन्त्र-तन्त्र-यन्त्रादयः विविधाः उपायाः निर्दिष्टाः सन्ति। अस्मिन् लेखे मन्त्र-तन्त्र-यन्त्राणां स्वरूपं, तेषां पारस्परिकसम्बन्धः तथा रोगनिवारणे तेषां प्रयोगः विस्तरेण विविच्यते।

'मन्त्र'शब्दस्य व्युत्पत्तिः मनन-त्राणयोः सम्बन्धेन क्रियते। मननात् त्रायते इति मन्त्रः। ऋग्वेद-यजुर्वेद-सामवेद-निगदादिषु मन्त्राणां प्रयोगः दृश्यते। मन्त्राः पौरुषेयाः अपौरुषेयाश्च भवन्ति। वैदिकमन्त्राः अपौरुषेयाः, सिद्धर्षिप्रणीताः मन्त्राः पौरुषेयाः इति विवेचनम् अत्र दृश्यते। विविधभाषानिबद्धाः शाबरमन्त्राः अपि रोगनिवारणादिषु प्रयुज्यन्ते।

'तन्त्र'शब्दस्य विविधाः अर्थाः शास्त्रेषु प्रतिपादिताः सन्ति। तन्त्रं साधनम्, शास्त्रम्, व्यवहारः, नियमः इत्याद्यर्थेषु प्रयुज्यते। शिवप्रोक्तं विधानशास्त्रं तन्त्रम् इति लेखे प्रतिपादितम्। तन्त्रस्य लक्षणेषु सर्गः, प्रतिसर्गः, मन्त्रनिर्णयः, देवतानां संस्थानम्, आश्रमधर्मः, यन्त्रनिर्णयः, राजधर्मः, दानधर्मः, व्यवहारः तथा अध्यात्मवर्णनम् इत्यादयः विषयाः अन्तर्भवन्ति।

'यन्त्र' देवताधिष्ठानरूपं पूजासाधनं च मन्यते। विविधेषु शास्त्रेषु यन्त्रस्य अनेकाः प्रयोगविधयः वर्णिताः सन्ति। पूजायन्त्रं, धारणयन्त्रं, रसादिद्रव्यसाधनयन्त्रं, ज्योतिषशास्त्रीययन्त्रं च तेषु प्रमुखाः सन्ति। यन्त्रं मन्त्रात्मकं तथा देवतात्मकं मन्यते, तस्य पूजनेन देवता प्रसन्ना भवतीति तान्त्रिकग्रन्थेषु प्रतिपादितम्। रोगचिकित्सायां मन्त्राणां प्रयोगः वैदिकपरम्परायां विशेषमहत्त्वपूर्णः आसीत्। शरीरसादनम्, चक्षुरोगशान्तिः, अजीर्णरोगशान्तिः, रुजाशमनम्, औषधिगुणसम्पादनम्, अभिचारोपशमनम् तथा वास्तुदोषशान्तिः इत्यादिषु मन्त्रप्रयोगाः उल्लिखिताः सन्ति। अथर्ववेदे तथा अन्येषु वैदिकग्रन्थेषु रोगनाशाय विविधाः प्रयोगाः उपलब्धाः सन्ति।

तान्त्रिकयन्त्रप्रयोगेण अपि रोगकष्टनिवृत्तेः उल्लेखः प्राचीनग्रन्थेषु दृश्यते। दुर्गासप्तशतीपाठः, तद्गतयन्त्रानुष्ठानम्, विविधभाषानिबद्धमन्त्रप्रयोगाः, बालानां रोगरक्षणाय मन्त्र-यन्त्र-औषधीनां प्रयोगश्च परम्परायां प्रचलितः आसीत्। यन्त्रचिन्तामणिग्रन्थे विविधरोगकष्टनिवारणाय शताधिकयन्त्राणां वर्णनमपि निर्दिष्टम् अस्ति।

अतः मन्त्र-तन्त्र-यन्त्राणां प्रयोगः भारतीयप्राचीनचिकित्सापरम्परायाः एकः महत्त्वपूर्णः अङ्गः आसीत् इति ज्ञायते। एते उपायाः केवलं शारीरिकरोगशमनाय न, अपितु मानसिकशान्तये, आध्यात्मिककल्याणाय तथा जीवनसम्बद्धानाम् अनिष्टानां निवारणाय अपि प्रयुक्ताः इति लेखस्य प्रतिपादनम्। आधुनिकविज्ञानस्य विकासेन प्राचीनप्रयोगाः किञ्चित् उपेक्षिताः सन्ति, तथापि तेषां परम्परागतमहत्त्वं तथा सांस्कृतिकं योगदानं विस्मर्तुं न शक्यते।

**Keywords:** *मन्त्र, तन्त्र, यन्त्र, रोगचिकित्सा, रोगनिवारण, वैदिक चिकित्सा, मन्त्रचिकित्सा, कर्मविपाक।*

---

* आचार्यः, वेदविभागः, संस्कृतविद्याधर्मविज्ञानसंकायः, काशीहिन्दूविश्वविद्यालयः, वाराणसी, ई-मेल : hareeshwarhod@gmail.com

जाताभिवृद्धिक्षयादिप्रमुखै: षड्भावविकारैरावृत्तोऽयंलोक:[१] स्वकर्मफलैर्निवद्ध: घटिकायन्वत् स्वजन्ममरणलीलां वरयति। **''नाभुक्तंक्षीयते कर्म कल्पकोटिशतैरपीति''**[२] शास्त्रवचनाज्जीवस्य स्वकर्मफलभोगरनिवार्य एव। कर्मफलानुरोधेनैव तस्य तत्तद्भौगोलिकवातावरणे धनाढ्यदरिद्रादिपरिवारे आधिदैविकाधिभौतिकाध्यात्मिकादि सुख-दुखैरावृतो जनिर्भवति जीवनं च यापयति। पूर्वजन्मकृताशुभकर्मणां फलमेवविविधव्याधिरूपेण पीडयति। उक्तं हि-

**पूर्वजन्मकृतं पापं व्याधिरूपेण पीड्यते।**

**तच्छन्तिरोषधैर्दानैर्जपहोमसुरार्चनै:।।**[३]

अत एव शास्त्रेषु जीवने समागतानां समस्तारिष्टानां निवारणाय मणि-मन्त्रौषधादय उपाया: समुपदिष्टा: सन्ति। एतेषामेवोपायानां मध्ये मन्त्र-तन्त्र-यन्त्रादय उपाया: अन्तर्भूता: सन्ति। एतैस्त्रिविधोपायै: रोगाणां निवारणं कथं भवतीति विवरणप्रदानात् प्राव्â पारिभाषिकार्थज्ञानं प्रथमत आपतति। अतस्तेषां स्वरूपचिन्तनमत्र प्रस्तूयते।

मन्त्र: -

**मन्त्रा: मननात्।**[४] **मननात् त्रायते यस्मान् तस्मान् मन्त्रा: प्रकीर्तिता:।**[५]

**मननान्मुनिशार्दूल त्राणं कुर्वन्ति वै यत:।**

**ददते पदमात्मीयं तस्मान्मन्त्रा: प्रकीर्तित:।।**[६]

**ऋचो यजूँषि सामानि निगदा मन्त्रा:।**[७]

**अनुष्ठेयार्थस्मारका हि मन्त्रा:।८**

**प्रयोगसमवेतार्थ स्मारका मन्त्रा:।**[९]

**तच्चोदकेषु मन्त्राख्या शेषे ब्राह्मणशब्द:।**[१०]

**कर्मानुष्ठानौपाधिकप्रयोक्तव्यो वैदिकशब्दराशिर्मन्त्र:।।**[११]

**रहस्यालोचनं मन्त्र:।**[१२]

**मननात्सत्त्वरूपस्य देवस्यामिततेजस:।**

**त्रायते सर्वदु:खेभ्यस्तस्यान्मन्त्र इतीरित:।।**[१३]

**मन्त्रो ह्यन्तर्गुप्तभाषणात्मकपरपरामर्शतत्त्वेन मननत्राणधर्मा परतत्त्व प्राप्त्युपाय:**

(स्वछन्दोद्योक्तपटल:)[१४]

**तन्त्रसङ्ग्रहग्रन्थे अकारादि: क्षकारान्तावर्णानां बिन्दुसंयुक्तानां मन्त्रत्वं वर्णितम् ।**[१५]

इति विविधशास्त्रेषु मन्त्रस्वरूपं यथा यत्र वर्णितं तत्स्वरूपज्ञानाय संगृहीतम्। अत: परं तन्त्रस्वरूपचिन्तनं प्रस्तूयते-

तन्त्रम् -

- तन्त्रमितिकुलम्। यथा- **सर्वानुपायानथसम्प्रधाय समुद्धरेत् स्वस्य कुलस्यतन्त्रम्।**[१६]

**- वयनसाधनम्। ''तदापश्यत् स्त्रियौ तन्त्रे अधिरोप्य सुवेमे पटं वयन्तौ''**[१७]

**- शास्त्रम्। ''अवैरज्ञमतन्त्रज्ञं वालचेष्टा समन्वितम्''**[१८]

**- व्यवहारः, नियमादिः।** **श्रुत्वा त्वं प्रतिपद्यस्व प्राज्ञैः सहपुरोहितैः।**

**आपद्धर्मार्थकुशलैर्लोकतन्त्रमवेक्ष्य च।।**[१९]

- चतुःषष्टि संज्ञकं शिवोक्तशास्त्रम्। यथा-

**चतुःषष्टिश्च तन्त्राणि यामलादीनिपार्वति।**

**सफलानीहवाराहे विष्णुक्रान्तासु भूमिषु।।**[२०]

तन्त्रस्य लक्षणम् -

**सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णय एव च।**

**देवतानाञ्च संस्थानं तीर्थानाञ्चैव वर्णनम्।।**

**तथैवाश्रमधर्मश्च विप्रसंस्थानवमेव च।**

**संस्थानञ्चैव भूतानां यन्त्राणञ्चैवनिर्णयः।।**

**हरचक्रस्य चाख्यानं स्त्रीपुंसोश्चैवलक्षणम्।**

**राजधर्मो दान धर्मो युगधर्मस्तथैव च।**

**व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम्।।**

**इत्यादिलक्षणैर्युक्तंतन्त्रमित्यभिधीयते।।**[२१]

शास्त्रोक्तविवरणाघवलोकनेनेदं ज्ञायते यत् नृणामभीष्टफललाभाय शिवप्रोक्तं विधानशास्त्रं तन्त्रमित्यमिधीयते।

यन्त्रम् - देवाद्यधिष्ठानम्

**अर्थाभावे तथा यन्त्रं नवार्णमन्त्रसंयुतम्।**

**स्थापयेत्पीठपूजार्थं कलशं तत्र पार्श्वतः।।**[२२]

(यन्त्रम्) वायम् - **यन्त्रस्य गुणदोषौ न विचार्यौ मधुसूदन।**

**अहं यन्त्रं भवान् यन्त्री न मे दोषा न मे गुणाः।।**[२३]

(यन्त्रम् ) 'कल' इति भाषायाम् -**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुनतिष्ठति।**

**भ्रामयन् सर्वभूतानि यान्त्रारूढानि मायमा।।**[२४]

यथा- दारुमययन्त्रारूढ़ानि कृत्रिमाणि भूतानि सूत्राधारो लोके भ्रामयति तद्वदिति। यद्वा यन्त्राणि शरीराणि आरूढ़ानि भूतानि देहाभिमानिनो (जनान्) जीवान् भ्रामयन्नित्यर्थ:।[२५]

| | |
|---|---|
| यन्त्रम् (पूजाधारम्) | **आपोऽग्निर्हृदयं चक्रं विष्णो: क्षेत्रसमुद्भवम्।** |
| (पूजनयन्त्रम्) | **यन्त्रञ्च प्रतिमास्थानमर्चने सर्वदाह्लरे:।।[२६]** |
| | **शालग्राममणौ यन्त्रे प्रतिमामण्डलेषु च।** |
| | **नित्यं पूजा हरे: कार्या न तु केवल भूतले।।** |
| | **लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च।** |
| | **मण्डलस्थां महामायां यन्त्रस्थां प्रतिमासु च।** |
| | **जलस्थां वा शिलायां वा पूजयेत्परमेश्वरीम्।।** |
| | **यत्रापराजितापुष्पं जवापुष्पं च विद्यते।** |
| | **करवीरेशुक्लरक्ते द्रोणं वा यत्र तिष्ठति** |
| | **तत्र देवी वसेन्नित्यं तद् यन्त्रे चण्डिकार्चनम्।।[२७] (एतत्सर्वं यन्त्राभावे)** |
| | **यन्त्रं मन्त्रमयं प्रोक्तं मन्त्रात्मादेवतैव हि।** |
| | **देहात्मनोर्यथाभेदो यन्त्रदेवतयोस्तथा।।** |
| | **आदौ लिखेद् यन्त्रराजं देवतायाश्च विग्रहम्।** |
| | **कामक्रोधादिदोषोत्थसर्वदु:खनियन्त्रणात्।।** |
| | **यन्त्रमित्याहुरेतस्मिन् देव: प्रीणाति पूजित:।** |
| | **विना यन्त्रेणपूजायां देवता न प्रसीदति।** |
| | **दु:खनियन्त्रणाद् यन्त्रमित्याहुस्तन्त्रवेदिन:।।[२८]** |
| धारणयन्त्रम् - | **यन्त्रं च विन्ध्यवासिन्या: प्रोक्तं सर्व समृद्धिदम्।** |
| | **रक्षाकरं विशेषेण क्षुद्रभूतादिनाशनम्।** |
| | **राज्यदं भ्रष्टराज्यानां वश्यदं वश्यमिच्छताम्।। इत्यादि[२९]** |
| रसादिद्रव्यसाधनयन्त्रम् - | **ऊर्ध्वाध: सम्पुटाकारं तन्मध्ये रससंस्थितम्।** |
| (आयुर्वेदीययन्त्रम्) | **कवचीयन्त्रमित्येतद्रसादिद्रव्यसाधनम्।** |
| ज्योति: शास्त्रीयवेधयन्त्रम् - | **गोलो नाडीवलयं यष्टि: शङ्कुर्घटी चक्रम्।** |
| (गोलाध्यायोक्तयन्त्राणि) | **तापं तूर्यफंलकं धीरेकं पारमार्थिकं यन्त्रम् ।[३०]** |

एतावान्सन्दर्भस्यायमाशयोयत् - **मन्त्रो हि पौरूषेयापौरुषेयत्वेन मुख्यतया द्विविधः।**

**तत्रापौरुषेयाः वेदमन्त्राः पौरुषेयाश्चसिद्धर्षिभिः प्रणीताः।**

**युष्माभिः स्तुतयो याश्च याश्चब्रह्मर्षिभिः कृताः।**

**ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिम्।।**[३१]

तत्र पौरुषेया अपि द्विविधाः संस्कृतनिष्ठाः भाषानिवद्धाश्च। संस्कृतनिष्ठाः नवार्णादिमन्त्ररूपाः बीजाक्षरनिबद्धाश्च। विविधरोगविषाद्युपशामका तत्तद्भाषानिबद्धाः शाबरमन्त्राः।[३२] तान्त्रिकप्रयोगपरा अपि मन्त्राः संस्कृतनिष्ठा एव।

वैदिकप्रयोगद्भिन्नत्वेन अनुभष्ठानविधेः भिन्नत्वेन च प्रणीतत्वात् तान्त्रिकप्रयोगत्वेन तन्त्रस्य स्वतन्त्रप्रतिष्ठास्ति। तान्त्रिकप्रयोगस्य येन केनापि साधकेन कर्तुं प्रायः समधिकारात् क्वचिल्लोकप्रियतापि दृश्यते। अनेनापि मन्त्र प्रयोगवत् सर्वा अपि मानवसुलभाः अभिलाषाः सम्पूरयितुं जनः प्रभवति।

सामान्यतः जनानामयं विश्वासो यदितरेषु युगेषु तन्त्रमन्त्रयोः प्रतिष्ठासीत्, परन्तु कलौ यन्त्रस्य प्राधान्यं वर्तते। यन्त्रमित्युक्ते तत्स्वरूपं बहुधा समक्षमायाति। रोगाद्युपद्रवशान्तये भोजपत्रादिषु गोरोचनादिपदार्थविशेषैर्लेखनीयमाकृति विशेषं यन्त्रमितिकथ्यते।[३३] अथापीतराणि प्रसिद्धानि यन्त्राणि सन्ति। गायकानां वाद्ययन्त्रम्। वैद्यकानां रसायनसाधकं यन्त्रं शैल्ययन्त्रमित्यदि। ज्योतिर्विदां वेधकादियन्त्रम्। आधुनिकसंगणकादियन्त्राणां तु संख्यानं कर्तुं न शक्यते। विशेषतः यान्त्रिकयुगोऽयमिति तद्विदां व्यपदेशः। पारम्परिकयन्त्रैः आधुनिकैरपि यन्त्रैः रूजां निवारणं निदानं वा नूनं भवत्येव। अतोऽत्र मन्त्र-तन्त्र-यन्त्रैः रोगनिवारणविषये शास्त्रसिद्धानां प्रयोगसिद्धानाञ्च पारस्परिकोपायमत्र यथाप्रमाणं प्रस्तूयते।

**मन्त्रैः रोगनिवारणम् -**

वेदोक्तमन्त्राणां नित्य-नैमित्तिक-काम्यप्रयश्चित्तादिषु कर्मसु प्रयोगो भवत्येव। श्रौतसूत्रैः श्रौतयागाः प्रतिपाद्यन्ते स्मार्तसूत्रैश्च स्मार्तकर्माणि। मन्त्रैकत्वे सति प्रयोगबहुत्वमिति सिद्धान्तः ऋषिभिः स्वीकृतत्वात् एक एव मन्त्रः नित्य-नैमित्तिक-काम्यकर्मसु प्रयुज्यते। संहितायां पठितानां मन्त्राणां काम्यकर्मस्वपि प्रयोगो भवति। अत एव चतुर्षु वेदेषु काम्यप्रयोग प्रतिपादनाय विधानसूत्राणि विद्यन्ते। ऋविग्धानम्। यजुर्विधानम्। सामविधानम् अथर्वविधानञ्च।

रूजामुपद्रवाणां वा शान्तये प्रयोगाः दृश्यन्ते यथा-

शत्रोरूत्सादनम्। चक्षुरोगशान्तिः। अजीर्णरोगशान्तिः। यथा-

**अग्ने दब्धाय इति बह्वारभुक्त्वोदरमालभ्य जपेदश्वानमपि जारयति।**[३४]

रुजो मुक्तिः - **तनूपा अग्नेसीति रुजाग्रस्तो दूर्वा जुहुयान् रुजा मुच्यते।**[३५]

**औषधगुणसम्बर्धनेनारोग्यलाभः -**

**''या ओषधीत्यृगुभयेनौषधीमभिमन्त्र्य पाययेदारोग्यं भवति।''**[३६]

**अभिचारोपशमनम् -**

**"मा पाहिँसीरित्यभिचार्यमाण आज्यं जुहुयात् शान्तिर्भवति।"**[३७]

**वास्तुदोषशान्तिः -**

**"स नो भुवनस्येति गृहवास्तुनाज्याहुतीनामष्टसहस्रं जुहुयाद् वास्तु दोषान्मुच्यते।"**[३८]

एवमृग्विधानेसामविधानब्राह्मणेऽथर्ववेदेचानेके प्रयोगाः रोगनाशाय वर्तन्ते। अग्निपुराणे तु यजुर्वेदीयमन्त्राणां विभिन्नकाम्यकर्मसु प्रयोगः चतुरशीतिश्लोकैवर्णितो वर्तते। एवं वैदिकमन्त्रैः रोगचिकित्साविवरणमुपस्थापितम्। रोगाणां पापमूलत्वात् पापविनाशनेनैव रोगाणां शान्तिर्भवतीतिधिया क्वचित्पुण्यकर्मणा रोगशान्त्युपायः प्रदर्शितः। यथा श्रीमद्भागवते-

**तपसाब्रह्मचर्येण शमेनच दमेन च।**

**त्यागेन सत्य शौचाभ्यां यमेन नियमेन च।।**

**देहवाग्वुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः।**

**क्षिपन्त्यघं महदपि वेणुगुल्ममिवानलः।।**[३९]

केन पापेन कीदृशः रोगग्रस्तो भवति अथवैवं वक्तव्यं रोगं दृष्ट्वा पापस्यानुमानं कृत्वा तच्छान्तये उपाय उपदिश्यते। अन्वय व्यतिरेकाभ्यां पापरोगयोः सम्बन्धः।

तान्त्रिक मन्त्रप्रयोगेणापि रोगनाशः बहुधा श्रूयते क्रियते च। दुर्गासप्तशत्याः पाठेन तद्गतमन्त्रानुष्ठानेन च रोगकष्टेभ्योनिवृत्तिः प्रगोगसिद्धः साधितः प्राचीनैः सूरिभिः, अद्यापि तथैवानुष्ठाने प्रवर्तन्ते जनाः।

भाषागतसिद्धमन्त्रैः सर्प-वृश्चिक-व्रणादिपीडाभ्यः झटिति निवर्तन्ते जनाः।

यथा- करवलाई भाषामन्त्रेण व्रणपीडानिवृत्तिः-

**ॐ नमो करवलाई भरीतलाई जहाँ बैठ हनुमन्त आई।**

**पचै न फूटे चलै न लाल रक्षा करे गुरु गोरख बाल।।**

प्राकृत भाषायाम् - **ॐ नमो जिणाणं जिय भयाणं कित्तणेण सभपाई**

**उवसं मतु ह्री स्वाहा। इति मन्त्रेण सर्पभयनिवारणं क्रियते।**

उत्कलभाषायाम् - **वाण वाण अग्निवाण जाहाकुमारई वाण ह्वद फाटि जिव,**

**प्राण न जाउ बोलि काहार राण श्रीदुर्गांक कोटि कोटि राण।।**

एवं विविधभाषासु निबद्धानां मन्त्राणां प्रभावोऽव्यर्थः दृश्यतेऽनुभूयते च तर्हिवैश्रुतिकन्यायेन पवित्राणां वेदमन्त्राणां तन्त्रगतमन्त्राणां पौराणिकाणां वा मन्त्राणां का कथा। गङ्गाविष्णुश्रीकृष्णदासलक्ष्मीवेंकटेश्वरमुद्रणालयमुम्बईतः

सम्वत् -२०१४ (सन् १९५७) प्रकाशिते बालतन्त्रग्रन्थे विशेषतः बालानामाजन्मतः विविधरोगेभ्यो रक्षायै मन्त्राः यन्त्राणि ओषधयश्चोपदिष्टाः सन्ति, ते तत्रैव द्रष्टव्याः नात्र विस्तारभिया सङ्गृह्यन्ते। आनुषङ्गतः सामान्यरोणां चिकित्सा सर्वेषां कृते मन्त्र-तन्त्र-यन्त्रैः समुपदिष्टाश्च सन्ति।

अधुना यन्त्रैः रोगनिदानं कृत्वा रोगे मूलकारणं ज्ञात्वा चिकित्सवैâः रोगोपशमनाय व्यवस्था प्रदीयते। प्राचीनचिकित्सापद्धतौ गोरोचन-रक्तचन्दनादिपदार्थविशेषैः भूर्जपत्रादिषु लिखितैः आकृतिविशेषैः बीजाक्षरयन्त्रगतैः संख्यायुत्तैâर्वा यन्त्रैः रोगभयनिवारणाय कश्चित्प्रयोगविशेषः प्रचलित आसीत्। मुम्बईतः प्रकाशिते ''यन्त्रचिन्तामणिग्रन्थे'' मानवसुलसर्वविधकष्टानां निवृत्तये तद्द्वारा सुखलाभाय शताधिकयन्त्राणि उपदिष्टानि सन्ति। आकृतिविशिष्टेषु यन्त्रेषु पदार्थविशेषैः बीजाक्षरादि विन्यासपूर्वकं पूजने धारणे स्थापने च किमपि प्रभावविशेषं जनयति देहे गेहे वातावरणे चेति नाश्चर्यकरम्।

एवं मन्त्र-तन्त्र-यन्त्रादिभिः जीवने सौख्यलाभाय प्राचीनैः आचार्यैः व्यवस्था संस्थापिता वर्तते। तदिदानीं यान्त्रिके युगे जनैः विज्ञानसुलभोपायान् स्वीकृतत्वात् प्राचीनाः प्रयोगाः भृशमुपेक्षिताः। परन्त्वद्यापि ये तानङ्गीकुर्वन्ति प्राचीनप्रयोगविशेषान् अवश्यन्ते उपकृता भवन्तीति नात्र संशीतिलेशः।

**दुष्कर्मजा नृणां रोगा यान्ति चैव क्रमाच्छमम्।**
**जपैः सुरार्चनैहोमैर्दानैस्तेषां शमोभवेत्।।**
**पूर्वजन्म कृतं पापं नरकान्ते परिक्षयेत्।**
**वाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमः।।**
**कृतकर्मक्षयो नास्ति कल्पकोटिशतैरपि।**
**अवश्यमेवभोक्तव्यं कृतं कर्म शुभाशुभम्।।**
**कुष्ठं च राज यक्ष्मा च प्रमेहो ग्रहणी तथा**
**मूत्रकृच्छ्राश्मरी कासा अतिसारभगन्दरौ**
**दुष्टव्रणं गण्डमाला पक्षाधातोऽक्षिनाशनम्**
**इत्येवमादयो रोगा महापापोद्भवाः स्मृताः।**

(प्रायश्चित्तप्रकाशे कर्मविपाककाण्डः) श्लोक-४-८, पृ.-९३.

**सन्दर्भ -**

१. निरुक्तम् - १.१.२
२. अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्। नामुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।। (गरु.म.पु.)
३. गरु.म.पु.
४. निरु. २.६.३.
५. श.क.दु. ६१७.
६. ई.सं.३.७.९
७. का.श्रौ.सू.-१.३.१
८. का.श्रौ.सू.- १.३.५

९. अर्थसंग्रह- पृ. २६०.
१०. जै.सू.- २.१.३२-३३.
११. वेदशा. पर्या.- पृ. ३.
१२. शब्द क.दुर.- ६१५
१३. श.क.द्रु.- ६१५
१४. श.क.द्रु.- ६१५
१५. अकारादिक्षकारान्तमेकपञ्चाशदक्षरम्। एते वर्णा: प्रशस्यन्ते कामितार्थप्रदायका:। (तन्त्र सं. पटल-२, श्लोक सं-१.७१
१६. महाभा.-१३.४८.६.
१७. महाभा.- १.३.१४०.
१८. देवीभागवते- २.११.१९.
१९. महाभा.- १.१०३.२६.
२०. महाभ्विश्वसारतत्रम् श.क.द्रु-पृ.- ५८४.
२१. श.क.द्रु.- ५८४.
२२. देवी. भा.- ३.२६.२१.
२३. महाभारते श.क.द्रु.पृ.-१३.
२४. गीता- १८.६१.
२५. गीताया: श्रीधरस्वामीटीका।
२६. नारदीये- (श.क.द्रु.पृ.-१३)।
२७. योगिनीतन्त्रे (श.क.द्रु.पृ.-१३)।
२८. श.क.द्रु.पृ.-१३.
२९. श.क.द्रु.पृ.-१३.
३०. श.क.द्रु.पृ.-१६.
३१. दुर्गास-१२.२४.
३२. ॐ नमो करवलाई भरीतलाई जहाँ वैष्हनुमन्त आई, पचे न फूटे चले न नाल रक्षा करे गुरु गोख बाल।

ॐ णमो जिणायं गिय भयाणं कित्तणेण सभपाई उवसं मनु ह्री स्वाहा। (सर्यभयनिवारणमंत्र)

३३. शिव उवा च- यदाकस्योपरिराजा क्रुद्धो वांछति मारितुम्। तदा तन्मोहनाथीय दुष्टनिग्रहणाय च।। रोचनाकुंकुमेनैव लिखेन्यन्त्रं तु भूर्जके ।। (यन्त्रचिन्तामणि: पृष्ठ-१८)
३४. य.वि.सू.- १.१.
३५. य.वि.सू.- १.१४.
३६. य.वि.सू.- २.७.
३७. य.वि.सू.- २.३०.
३८. य.वि.सू.- ४.२५.
३९. श्रीमद्भागवतम्।

❑